শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীকৃষ্ণব্রহ্মতন্ত্রপরকালযতীন্দ্র অনুগৃহীতং

# ॥ শ্রী প্রপন্নানন্দস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী প্রপন্নানন্দস্তোত্রম্ ॥

শ্রীৱেঙ্কটধরণীধরপতিৱক্ষস্স্থলৱিশালকেলিগৃহম্।
জগদুজ্জীৱনসুস্মিতললিতমুখং তন্মমাস্তু ৱস্তু হৃদি ॥ **1** ॥

নিবরীসভ্রমরীরুচিকবরীসঙ্গতমনোজ্ঞসুমহারান্।
কলযামহেঽত্যুদারান্মুররিপুদারান্কৃতার্তিপরিহারান্ ॥ **2** ॥

নৱৱজ্রকলিতদিনকরসিতকিরণাভরণরুচিরকচভারান্।
করুণাভরসুস্মেরান্নুচিরৱিহারান্ভজে হরের্দারান্ ॥ **3** ॥

কুঙ্কুমতিলকিতফালং ৱিলুলিতসুস্নিগ্ধমুগ্ধকুন্তলজালম্।
কলযে ৱদান্যশীলং কলশাম্বুনিধেরপত্যমচ্যুতলোলম্ ॥ **4** ॥

নিটিলৱিজিতেন্দুবালং ভ্রূৱল্লিস্ফুরণৱশিতযদুবালম্।
লক্ষ্মীৱদান্যলীলং ৱস্তু মদীযেঽস্তু হৃদি ৱিনতপালম্ ॥ **5** ॥

চংপকসুমসমনাসাং সংপন্নিধিমাশ্রযেঽম্বুধিং ভাসাম্।
অমরীণাং সর্ৱাসাং শরণ্যচরণাং সরোরুহনিৱাসাম্ ॥ **6** ॥

কুৱলযরুচিমদৱিঘটনপটুনযনযুগং তৱার্থিকল্পনগম্।
স্ৱান্তে করোমি মুররিপুকান্তে শান্তে নিতান্তমেকান্তে ॥ **7** ॥

কলিতাশ্রিতার্তিভঙ্গান্ ৱশিতমহাপুরুষৱিভ্রমৱিভঙ্গান্।
সঞ্চিন্তযাম্যপাঙ্গান্মঙ্গলদেৱ্যাস্সদা মহোত্তুঙ্গান্ ॥ **8** ॥

ৱদনরুচিহৃদৱিহরন্নযনমহামীনরাজনিষ্ঠযুতম্।
নাসাৱিৱরৱিলগ্নং নূনং ধ্যাযামি মৌক্তিকং দেৱ্যাঃ ॥ **9** ॥

মুখৱিজিতচন্দ্রবিম্বং মুগ্ধাধরকান্তিধূতনৱবিম্বম্।
পঙ্কজনযনকুটুম্বং সঙ্কলযে সর্ৱসুরজনালম্বম্॥ **10** ॥

সকলজগদগ্রগণ্যং সরসিজনযনস্য পরিণতম্ পুণ্যম্।
অস্মাদৃশাং শরণ্যং ৱিভাৱযে মনসি কিমপি লাৱণ্যম্॥ **11** ॥

জগদীশ্ৱরৎৱযোগ্যং জগদীশ্ৱরৱিহরণৈকতমভোগ্যম্।
তৎকিমপি মহাভাগ্যং মম নৃত্যতু মনসি কল্পিতারোগ্যম্॥ **12** ॥

শুভদাযিনামধেযং সকলসুরস্তোমযুৱতিজনগেযম্।
গোৱিন্দভাগধেযং গোপাযতু মাং নতাৱলিৱিধেযম্॥ **13** ॥

মলযানিলকেলিসখং সুধাসহাধ্যাযিদিৱ্যতররচনম্।
ৱচনং সুধাব্ধিপুত্র্যা রচযতু সকলাং শ্রিযং মমাৱিকলাম্॥ **14** ॥

নিজদযিতৱদনৱিধুরুচিৱিলোকনাযাত্তমুকুরযুগলমিৱ।
ৱিমলং কপোলযুগলং কমলাযাশ্চিন্তযান্তরঙ্গ মম॥ **15** ॥

লক্ষ্ম্যা ৱদনশশাঙ্ক শ্রুতিযুগসঙ্কলিতৱজ্রতাটঙ্কম্।
ধ্যাযামি ধুতাতঙ্কং মুক্তামণিভূষিতং গতাশঙ্কম্॥ **16** ॥

ধৃতদিৱ্যকনকচেলাঃ কৈরৱবন্ধুস্তনন্ধযনিটালাঃ।
দিৱ্যাঃ কাশ্চন লীলা অৱ্যাসুর্ৱিকচপদ্মৱনলোলা॥ **17** ॥

চঞ্চলকটাক্ষরেখান্কাংশ্চিদুদঞ্চিতৱিভূষণমযূখান্।
কিলিকিঞ্চিতপরিৱঞ্চিতবলিৱঞ্চকমানসান্ভজামি রসান্॥ **18** ॥

কনকসরোরুহকুট্মলদাযাদস্তনভরান্গভীরতরান্।
কলযামি রূপৱিভৱান্কাংশ্বন লীলাতরঙ্গিতাত্মভৱান্॥ **19** ॥

অমৃতসখৱ্যাহারানাশ্রযৱিধুকিরণমদহরণহারান্।
ৱিভৱান্কাঞ্চিদপরান্ৱিশ্ৱজগজ্জীৱনস্তনক্ষীরান্॥ **20** ॥

নলিনালঙ্কৃতহস্তাং নলিনাক্ষস্য প্রিযাং সুগুণশস্তাম্।
প্রণমামশ্শতশস্তাং শরণাগতরক্ষণেষ্ৱৱিস্রস্তাম্॥ **21** ॥

মণিমযকঙ্কণৱলযং কলিতসুরাধীশখেদভরৱিলযম্।
কাঞ্চনকাঞ্চিকলাপানঞ্চিতৱিদ্যুল্লতাসদৃশরূপান্॥ **22** ॥

শরণাগতভরণানঘচরণামরুণাধরাং জগজ্জননীম্।
করুণাভরৱরুণালযপরিণাহিৱিলোচনাং ভজে শরণম্॥ **23** ॥

কিং বহুভির্দৈৱৈরিহ শম্বরডম্বরহরস্য তামম্বাম্।
অম্বুজনযনসখীং ৱিধুবিম্বমুখীং সংশ্রযানিশম্ হৃদয॥ **24** ॥

ললিতপদং কলিতমুদং জননিপদং শ্রেযসাং পঠন্ৱিশদম্।
স্তৱমিহ তৱ প্রপন্নানন্দং ৱিন্দত্যমন্দমানন্দম্॥ **25** ॥

স্তুতিমিতি মহিশূরপুরীচামমহীপালকুলসমৃদ্ধিকৃতে।
তৎকুলগুরুর্ৱ্যতানীচ্ছ্রীকৃষ্ণব্রহ্মতন্ত্রপরকালঃ॥ **26** ॥

॥ শ্রী প্রপন্নানন্দস্তোত্রং সমাপ্তম্॥